**COHERENCE** – The Multidisciplinary Research Journal
Volume No: 4, Issue No: 2, Year: 2013 (July-December)
PP: 22-25
ISSN: 0976-5301
Peer Reviewed & Refereed Journal
Journal Website www.coherencejournal.in

# पंडितकृष्णावधूत कृत काव्य लक्षण समीक्षा

**डॉ. अशोक कुमार आजाद**
प्रधानाचार्य, नागार्जुन उमेश संस्कृत महाविद्यालय, तरौनी, दरभंगा, बिहार

ऊनविंशतिशताब्द्यां दक्षिणे भारते वर्तमाने कर्णाटकप्रान्ते बल्लारिमण्डले होसपेटसमीपे नारायणदेवरकेरे ग्रामे प्रादुर्भूतः प्राच्यविद्याकाशस्य नक्षत्रराट् पण्डितप्रवरः कृष्णावधूतो विविधविद्याविधासु पञ्चाशत्तोऽपि अधिकान् ग्रन्थान् रराच । तत्र 'काव्यलक्षणसंग्रहः[1] काव्यनवनीतम्'[2] च द्वौ ग्रन्थौ यद्यपि लघुकायौ तथापि विवेच्यविषयदृशा विषयप्रतिपादनदृशा चातिमहत्त्वपूर्णौ स्तः। काव्यशास्त्रे प्रवेष्टुकामानां व्युत्पित्सूनां कृते ग्रन्थद्वयं बहुलाभाय भवेदिति भाति । काव्यलक्षणसङ्ग्रहे मङ्गलाचरणानन्तरं काव्यलक्षणं कुर्वन् ग्रन्थकारः लिखति —

"सालङ्कारगुणौ काव्यं शब्दार्थौ दोषवर्जितौ ।
तथा कवीनां समयानुरोधेन निबन्धितम् ॥"[3]

काव्यनवनीते च —

"कविसमयानुबद्धौ शब्दार्थौ काव्यम्।"[4]

वृत्रिश्चात्र —

"शब्दार्थयोरविनाभावाद् द्विवचनम्.।"[5]

"काव्यस्य शब्दार्थौ शरीरम् । कविसमयो जातिः। व्यङ्ग्यं जीवितम् । नायक आश्रयः । गुणदोषवृत्तिरीति-प्रवृत्तिपाकशय्यालङ्कारा लोकवत् ।"[6]

लक्षणद्वयपरिशीलनेन शब्दार्थयोः उभयोः काव्यसंज्ञा इति ज्ञायते। कीदृशयोः शब्दार्थयोः ? सालङ्कार गुणयोः दोषवर्जितयोः । 'शब्दार्थौ सहितौ काव्यमित्याह भामहः' ।[7] तद 'दोषौ शब्दार्थौ सगुणावनलङ् कृती पुनः क्वापि' इत्याह मम्मटः।[8] 'इष्टार्थबोधकपदसमूहः काव्यशरीरमिति दण्डी।[9] काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते' इति वामनः[10] । 'वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः' इति विश्वनाथः"[11]। पण्डितराजजगन्नाथेन रमणीयार्थप्रतिपादकः शब्दः काव्यमित्यभिधायि । पण्डितराजं विहाय प्रायः सर्वैः आचार्यैः शब्दार्थयोः काव्यसंज्ञा स्वीक्रियते । तथैवात्र कृष्णावधूतः शब्दार्थयोर विनाभावात् उभयोः काव्यत्वमाह । तदभिप्रायस्तु सहृदयहृदयाह्लादने उभयोः समप्राधान्यम् । उभयत्र रमणीयतायामीषन्मात्रन्यूनता सोढुम् असह्यौवेति भावेन द्विवचनमुपातम् । यथाह कुन्तकः —

"समसर्वगुणौ सन्तौ सुहृदाविव संगतौ ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा ॥"[12]

ध्वनिवादिनोः आचार्ययोः मम्मटविश्वनाथयोः काव्यलक्षणाभ्यां सह तुल्यते चेत् ज्ञायते यत् तत्र काव्ये अलङ्काराणां स्थितिः अपरिहार्या तद् यथोक्तं- सालङ्कार- गुणाविति । कविसार्वभौमः विश्वनाथः मम्मटकृतकाव्यलक्षणे 'अदोषौ' इति पदसन्निवेशे शङ्काः उद्भावयति - काव्यलक्षणे 'अदोषत्वम् अन्तर्भवति किम्? दोषरहितयोः शब्दार्थयोः काव्यत्वे काव्यशब्दार्थभूतवस्त्वेव जगति न स्यात् । सर्वत्र यः कश्चन दोषो भवेदेव। किञ्चिद्दोषवतोऽपि व्यङ्ग्यार्थभूयिष्ठस्य सहृदयहृदयाह्लादकस्य उत्तमकाव्यत्वं प्रेक्षावन्तः अङ्गीकुर्वन्त्येव । किञ्च दोषत्वेन परिगणिताः दुःश्रवत्वादयो यदि रसानपकर्षकाः तर्हि न ते दोषाः भवन्ति । तद्यथोक्तम् आनन्दवर्धनेन —


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal
Journal Website www.coherencejournal.in

"श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः ।
ध्वन्यात्मन्येव श्रृङ्गारे ते हेया इत्युदाहृताः ॥"[13]

ध्वन्यात्मवादिनः आचार्याः काव्ये रसं व्यङ्ग्यं जीवितभूतम् आत्मानं वा मन्वन्ते । तेषां मते आत्मभूतरसस्य स्फुटप्रतीतौ, सत्यपि दोषे, न काव्यत्वहानिः तद्यथोक्तम्—

"कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाध्वनुभवः स्फुटः ॥" [14]

मम्मटविश्वनाथौ उभावपि आचार्यौ काव्ये प्रधानभूतरसस्य अपकर्षकतत्त्वान् दोषान् मन्वाते । तथैव पण्डित कृष्णावधूतोऽपि दोषं लक्षयति—

"काव्यापकर्षहेतुर्दोषः । अपकर्षो नाम सहृदयानानन्दः।"[15]

अथवा 'अनुदरा कन्या' इत्यत्रेव 'अदोषौ' (दोषवर्जितौ) इत्यत्र अल्पार्थे नञ् । तदा दोषे सति बलवद् दोषरहितौ शब्दार्थौ काव्यमिति लक्षणं स्वीकरणीयम् ।

अलङ्कारं लक्षयति—

"शब्दार्थयोः शोभामाधाय व्यङ्ग्यमुपस्करोत्यात्मानं
देहस्थहारादिरिवालङ्कारः।"[16]

यथा आत्मविभूषितस्य शरीरस्यैव हारादय अलङ्काराः शोभां जनयन्ति अनात्मनः शरीरस्य तु न तथैव अलङ्कारा अपि रसात्मनोः शब्दार्थयोः एव । अत एव दोषालङ्काराणां प्रायिकत्वं स्वीक्रियते चेत कृष्णावधूतकृतं प्रकृतकाव्यलक्षणं सर्वथा निर्दुष्टं स्या ।

गुणानां नित्यत्वात् प्रायः सर्वैः आचार्यैः काव्ये तेषाम् अनिवार्यरूपेण स्थितिः स्वीक्रियते ।

पण्डितकृष्णावधूत कृत काव्यलक्षणस्य महत्त्वपूर्णं वैशिष्ट्यं काव्यनिबन्धने कविसमयस्य परिपालने समापतति । काव्यनवनीताख्ये ग्रन्थे तु "कविसमयानुबद्धौ शब्दार्थौ काव्यमित्येव" भणितम् । अनेन काव्यजगति कविसमयस्य महत्त्वम् अभिव्यज्यते। को नाम कविसमयः ? जातिरित्याह लक्षणकारः । वस्तुतः अयं कविसमयः परम्पराप्राप्ता रूढ़िः प्रसिद्धिः वा यस्याः परिपालनं कविभिः अपेक्षितमिति अवश्यमेव कविसमयः कविभिः रक्षणीयः ।

कविसमय-शब्दोऽयं सर्वप्रथमं महाकविना राजशेखरेण प्रयुक्तः प्रतीयते । कविसमयं परिभाषयता तत्रभवता लिखितम्—

"अशास्त्रीयमलौकिकञ्च परम्परायातं यमर्थमुप- निबध्नन्ति कवयः स कविसमयः ।[17]

इममेवार्थं विशदीकुर्वन् स लिखति —

"पूर्वे हि विद्वांसः सहस्रशाखं साङ्गं च वेदमवगाह्य शास्त्राणि चावबुध्य, देशान्तराणि द्वीपान्तराणि च परिभ्रम्य यानर्थानुपलभ्य प्रणीतवन्तस्तेषां देशकालान्तरवशेन अन्यथात्वेऽपि तथात्वेनोपनिबन्धो यः स कविसमयः । कविसमय-शब्दश्चायं मूलमपश्यद्भिः प्रयोगमात्रदर्शिभिः प्रयुक्तो रुढश्च ।"[18]

महाकविराजशेखरस्य अनेन वर्णनेन कविसमयस्य यत् स्वरूपं निर्मीयते तदस्ति — अशास्त्रीयम् अलौकिकं परम्पराप्राप्तञ्च। वस्तुतः काव्यसंसारः ब्रह्मणः सृष्टेः भिन्नः वर्तते –

"अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥
भावानचेतनानपि चेतनवच्चेतनानचेतनवत् ।


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal
Journal Website www.coherencejournal.in

व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया ॥"[19]

हंसविषये आभाणकमेकं प्रचलितम् - हंसः नीरक्षीरविवेकी पक्षी अस्ति । अतीते कस्मिंश्चित् काले हंसस्य एषः गुणः अभविष्यत् किन्तु इदानीं न दृश्यते । आचार्य महावीरप्रसाद द्विवेदी स्वकीये 'हंस का नीरक्षीर विवेक' शीर्षक निबन्धे बहूनां पश्चिमापश्चिमानां च विदुषां वैज्ञानिकानाञ्च प्रयोगोल्लेखपुरस्सरं लिखति यत् हंसस्य नीरक्षीरविवेकविषये किमपि निश्चितं प्रमाणं नोपलभ्यते । परञ्च अद्यत्वे न केवलं काव्यजगति अपि तु लोकेऽपि इदम् आभाणकं प्रचलति । न्यायप्रियस्य कस्यचित् जनस्य न्यायाधीशस्य कृते लोका: 'नीरक्षीरविवेकी' इतिविशेषणपदं प्रयुञ्जन्ति । स्पष्टतया नीरक्षीरविवेकित्वं न केवलं तथ्यम् अपितु प्रतीकम् अपि ।

वस्तुतः लोके कविः एव सर्जकः स चेतनभावान् अपि अचेतनवत् अचेतनभावान् च चेतनवत् वर्णयति। अत्र स स्वातन्त्र्यं भजति । अस्य काव्यलोकस्य स्वकीया परम्परा विद्यते । अस्यां परम्परायां सतोऽपि वस्तुनः भावस्य वा अनिबन्धनं असतोऽपि वस्तुनः भावस्य वा निबन्धनं दृश्यते । क्वचित् नियमेन क्वचित् विकल्पेन वा वस्तुनिबन्धनं प्राप्यते । सत्कवीनां प्रबन्धे एव फलवतः अशोकवृक्षस्य अफलत्वं चन्दनस्य चाफलत्वम् अपुष्पत्वं दृश्यते । वसन्तं विहाय अपरर्तौ कोकिलकूजनाभावो मयूराणां रुतं नृत्यं च केवलं वर्षर्तौ एव दृश्यते। अत एव कविसमय: अलौकिकम् अशास्त्रीयं चोच्यते।

पण्डितकृष्णावधूतः कविसमयान् चतुर्धा[20] विभजति सतोऽप्यनिबन्धनम्, असतोऽपि निबन्धनम्, नियमेन विकल्पेन च निबन्धनम् । क्रमाद् यथा - वसन्ते मालतीपुष्पम्, किर्तौ शुभ्रत्वादि, मलये चन्दनादि, चन्द्रे शेशो मृगो वा । मन्दारमरन्द चम्पूरिति [21] अन्यस्मिन् ग्रन्थे कवि समय: उदाहरणपुरस्सरं चर्चितोऽस्ति —

**1.** सतोऽप्यनिबन्धनम्—

अयने चन्द्रिकासम्पत्पक्षयोः शुक्लकृष्णयोः।

वसन्ते मालतीपुष्पं कामिदन्तेषु रक्तता ॥

फलपुष्पे - चन्दने_ _ _ _ _ _ _ _ _ _ _ _

न वर्णयेत्सतोऽप्येतान् प्रबन्धेषु कदाचन ॥

**2.** असतो निबन्धनम् —

हंसे किर्तौ च शुभ्रत्वं दार्ढयं दुष्कीर्तिपापयोः इत्यादि।

**3.** नियमेन निबन्धनम्—

बहुकालस्थितस्यापि शिवचन्द्रस्य बालता ।

मनुष्या मौलितो वर्ण्या देवाश्चरणतस्तथा ॥ इत्यादि ।

**4.** विकल्पेन निबन्धनं यथा —

कृष्णत्वं हरितत्वं वा कमलासम्पदोर्मतम् ।

पीतत्वं रक्तता वाऽग्नौ परागे स्वर्णविद्युतो: ॥[22] इत्यादि ।

महाकविः राजशेखरः कविसमयं त्रिधा विभजति —

"स च त्रिधा स्वर्ग्यो भौमः पातालीयश्च । स्वग्यापातालीययोः भौमः प्रधानः। स हि महाविषयः ।" भौमकविसमय: जातिद्रव्यगुणक्रियाभेदेन चतुर्धा पुनः सदसन्नियमभेदेन त्रिधा ।[23]

महाकविः विश्वनाथोऽपि साहित्यदर्पणे कविसमयान् वर्णयति– "मालिन्यं व्योम्नि पापे, यशसि धवलता वणर्यते हासकीर्त्योः_ _ _ _ _ जलधरसमये मानसं यान्ति हंसा ।"[24] इत्यादयः।


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal
Journal Website www.coherencejournal.in

एवं कविसमयोल्लेखस्तु बहुषु लक्षणग्रन्थेषु प्राप्यते परन्तु अवधूततः पूर्वतनेषु काव्यलक्षणेषु अस्य समावेशः कुत्रचिद् अपि न दृश्यते । कृष्णावधूत पण्डितस्य काव्यलक्षणस्य वैशिष्ट्यं तु कविसमयस्य तत्र समावेशः। इति दिक् ।

## सन्दर्भ सूचीः-

1. काव्यलक्षणसंग्रहः
2. काव्यनवनीतम् (पण्डित कृष्णा वधूतकृतग्रन्थौ पूर्ण प्रज्ञसंशोधनमन्दिरम् - बेङ्गलुरुतः प्रकाशितौ ।)
3. काव्यलक्षणसंग्रहः, द्वितीय कारिका ।
4. काव्यनवनीतम्, तृतीय गोलके, आदौ ।
5. काव्यलक्षण संग्रहः, काव्यलक्षणे वृत्तिः ।
6. काव्यनवनीतम्, काव्यलक्षणे वृत्तिः ।
7. काव्यालङ्कार — 1-16
8. काव्यप्रकाशः, प्रथम उल्लासः प्रथमकारिका
9. काव्यादर्शः — 1-9 एवं 10
10. काव्यालङ्कार सूत्रवृत्तिः — 1-1-1
11. साहित्यदर्पणम्, प्रथमः परिच्छेदः कारिका - 3
12. वक्रोक्तिजीवितम् — 18, प्रथमोन्मेषः ।
13. ध्वन्यालोकः, द्वितीयोद्योतः, कारिका — 11
14. साहित्यदर्पणोदाहृतप्राचीनकारिका — 1-2
15. काव्यनवनीतम्, चतुर्थगोलकम् ।
16. काव्यनवनीतम्, तृतीयगोलकम्
17. काव्यमीमांसा, पृष्ठ - 190
18. काव्यमीमांसा, पृष्ठ -191
19. ध्वन्यालोकः तृतीय उद्योतः कारिका - 43
20. काव्यनवनीतम्, तृतीय गोलकम् ।
21. पण्डितकृष्णावधूतस्यैव अपरः ग्रन्थः । पृ० 193-195
22. काव्यमीमांसा पृष्ठ - 191
23. तत्रैव,
24. साहित्यदर्पण, सप्तम परिच्छेदः, 11-13


© Copyright @ Authors